SEA

# 3524

**Series**

**A**

# SANSKRIT LITERATURE

| प्रश्न–पुस्तिका क्रम संख्या Question Booklet Sl. No. |
|---|
| 4503161 |

A

अनुक्रमांक
Roll No.

परीक्षार्थी अपना अनुक्रमांक दिए गए खानों में लिखें।
Candidate should write Roll No. in the given boxes.

मुद्रित पृष्ठों की संख्या/No. of Printed Pages : **16**

कुल प्रश्नों की संख्या/Total No. of Questions : **150**

समय/Time : **3 घण्टे/Hours**

पूर्णांक/Total Marks : **600**

## परीक्षार्थियों के लिए निर्देश

1. परीक्षा प्रारम्भ होने के तुरन्त बाद, आप इस प्रश्न–पुस्तिका की पड़ताल अवश्य कर लें, कि इसमें कोई बिना छपा, फटा या छूटा हुआ पृष्ठ अथवा प्रश्नांश, आदि **न** हो। यदि ऐसा है, तो वीक्षक से तत्काल संपर्क कर प्रश्न–पुस्तिका बदल लेवें।
2. इस प्रश्न–पुस्तिका में **संस्कृत साहित्य** से संबंधित कुल **150** प्रश्न हैं। **सभी** प्रश्न अनिवार्य हैं।
3. प्रदत्त उत्तर–पत्र (ओ.एम.आर. शीट) पर दिए गए निर्देशों को ध्यानपूर्वक पढ़ें तथा अपने उत्तर तदनुसार अंकित करें।
4. कृपया उत्तर–पत्र (ओ.एम.आर. शीट) पर निर्धारित स्थानों पर आवश्यक प्रविष्टियाँ करें, अन्यत्र स्थानों पर नहीं।
5. परीक्षार्थी सभी रफ़ कार्य प्रश्न–पुस्तिका के अंतिम पृष्ठों पर निर्धारित स्थान पर ही करें, अन्यत्र कहीं नहीं तथा उत्तर–पत्र (ओ.एम.आर. शीट) पर भी नहीं।

## INSTRUCTIONS TO THE CANDIDATES

1. Immediately after the commencement of the examination, you should check that this Question Booklet ***does not*** have any unprinted or torn or missing pages or items etc. If so, immediately contact the Invigilator and get it replaced with another Question Booklet.
2. This Question Booklet contains Total **150** questions of concerned **Sanskrit Literature** subject. **All** questions are compulsory.
3. Read carefully the instructions given on the Answer Sheet (OMR) supplied and indicate your answers accordingly.
4. Kindly make necessary entries on the Answer Sheet (OMR) at the places indicated and nowhere else.
5. Examinee should do all rough work on the space meant for rough work on pages given at the end of the Question Booklet and nowhere else, not even on the Answer Sheet (OMR).



SEA

## द्वितीय प्रश्न–पत्र
## संस्कृत साहित्य

1. ''रविसंङ्क्रान्त सौभाग्यस्तुषारांवृतमण्डलः ।
निःश्वासान्ध इवादर्शः चन्द्रमा न प्रकाशते ।।''
इत्यत्र ध्वनिभेदः विद्यते
(A) अत्यन्ततिरस्कृतवाच्यध्वनिः
(B) अर्थान्तरसङ्क्रमितवाच्यध्वनिः
(C) संलक्ष्यक्रमव्यङ्ग्यध्वनिः
(D) असंलक्ष्यक्रमव्यङ्ग्यध्वनिः

2. ''न सम्भवत्येव ध्वनिर्नामापूर्वः कश्चित् । तस्मात् प्रवादमात्रं ध्वनिः'' इति केषां मतमस्ति ?
(A) भाक्तवादिनाम्
(B) अनिर्वचनीयतावादिनाम्
(C) अभाववादिनाम्
(D) अन्विताभिधानवादिनाम्

3. ''तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिम्'' इति के कथयन्ति ?
(A) अभाववादिनः
(B) भाक्तवादिनः
(C) अनिर्वचनीयतांवादिनी
(D) अन्विताभिधानवादिनी

4. ''अतिव्याप्तेरथाव्याप्तेर्नचासौ लक्ष्यते तया'' इत्यत्र कः न लक्ष्यते ?
(A) वाच्यः
(B) रसः
(C) गुणः
(D) ध्वनिः

5. औचित्यप्रस्थानप्रवर्तकः आचार्यः कः ?
(A) क्षेमेन्द्रः
(B) भरतः
(C) वामनः
(D) दण्डी

6. "यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते । फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।।" – इत्यत्र यच्छब्दस्यार्थो भवति –
(A) तापादिः
(B) दुर्गन्धादिः
(C) पावनत्वादिः
(D) ग्रीष्मादिः

7. मम्मटानुसारं "सर्वं जानाति देवः" इत्यत्र देव शब्दो युष्मदर्थे ज्ञातव्यः
(A) लिङ्गेन
(B) सामर्थ्येन
(C) देशेन
(D) प्रकरणेन

8. भद्रात्मनो दुरधि रोहतनोर्विशालवंशोन्नतेः कृतशिलीमुख संग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततंकरोऽभूत् ।।
– अस्मिञ्छ्लोके प्रतीयमानः अर्थः अस्ति –
(A) गजः
(B) राजा
(C) वंशः
(D) भद्रः

9. "वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।।" – अस्मिञ्श्लोके बोद्धव्य शब्दस्यार्थो भवति

(A) ध्वनेर्विकार:

(B) प्रतिपाद्य:

(C) प्रकरणम्

(D) प्रस्ताव:

10. कोऽर्थ: अर्थान्तरं व्यनक्ति

(A) शब्दप्रमाणवेद्योऽर्थ:

(B) अनुमानप्रमाणवेद्योऽर्थ:

(C) प्रत्यक्षप्रमाणवेद्योऽर्थ:

(D) उपमानप्रमाणवेद्योऽर्थ:

11. अधोलिखितासु का वामनाभिमता रीतिर्नास्ति ?

(A) गौडीया

(B) वैदर्भी

(C) पाञ्चाली

(D) मागधी

12. लाटीया रीति: केन प्रतिपादिता ?

(A) वामनेन

(B) भामहेन

(C) विश्वनाथेन

(D) उद्भटेन

13. वक्रोक्तिजीविते कविप्रस्थानहेतव: प्रोक्ता: सन्ति ।

(A) सङ्घटना:

(B) मार्गा:

(C) रीतय:

(D) प्रवृत्तय:

14. वामनमते समग्रगुणा रीतिरस्ति

(A) वैदर्भी

(B) गौडीया

(C) पाञ्चाली

(D) अवन्तिका

15. ओज: कान्तिमती रीतिरस्ति

(A) वैदर्भी

(B) गौडीया

(C) पाञ्चाली

(D) मागधी

16. 'शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्द्विधा' इति क उक्तवान् ?

(A) कुन्तक:

(B) भामह:

(C) दण्डी

(D) वामन:

17. काव्यं तु जायते जातु

(A) कस्यचित्

(B) अभ्यासशालिन:

(C) प्रतिभावत:

(D) व्युत्पत्तिशालिन:

18. रसविरोधि आचार्या: के ?

(A) अभिनवगुप्त

(B) आचार्य रुद्रट

(C) आचार्य जगन्नाथ

(D) आचार्य धनिक

19. दण्डिन: काव्यलक्षणमस्ति

(A) शब्दार्थौ सहितौ काव्यम्

(B) वाक्यं रसात्मकं काव्यम्

(C) शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली

(D) रमणीयार्थ प्रतिपादक: काव्यम्

**20.** दण्डिना कतिविधं काव्यं स्वीकृतमस्ति ?
(A) त्रिविधम्
(B) द्विविधम्
(C) चतुर्विधम्
(D) पञ्चविधम्

**21.** रिक्तस्थानं पूरयतु
मुखप्रतिमुखे ________ संहतिः ।।
(A) बिन्दुपताकाख्योप
(B) यत्नप्राप्त्याशोप
(C) गर्भसावमर्शोप
(D) सन्धौ सावगर्भोप

**22.** कैशिकी वृत्तेः लक्षणं
(A) गीतनृत्यविलासाद्यैर्तीक्ष्णाघातचेष्टितैः ।
(B) नर्मतत्स्फिञ्जतद्भेदैः बाह्याकारचेष्टितैः ।
(C) गीतनृत्यविलासाद्यैर्मृदुशृङ्गारचेष्टितैः ।
(D) विशोकालापसन्तप्तैः मृदुशृङ्गारचेष्टितैः ।

**23.** उचितं मेलनं करोतु ।

| सूची – I | सूची – II |
|---|---|
| 1. विकत्थनः | i. धीरोद्धतः |
| 2. अविकत्थनः | ii. धीरप्रशान्तः |
| 3. द्विजादिकः | iii. धीरललितः |
| 4. कलासक्तः | iv. धीरोदात्तः |

(A) 1 – i 2 – ii 3 – iii 4 – iv
(B) 1 – iv 2 – iii 3 – ii 4 – i
(C) 1 – iii 2 – ii 3 – iv 4 – i
(D) 1 – i 2 – iv 3 –ii 4 – iii

**24.** 'रत्नावली' नाटिकायाः नायकः उदयनः वर्तते
(A) धीरोदात्तः
(B) धीरोद्धतः
(C) धीरप्रशान्तः
(D) धीरललितः

**25.** 'स्वकीया' नायिकायाः भेदेषु इयं नास्ति
(A) मुदिता
(B) मुग्धा
(C) मध्या
(D) प्रगल्भा

**26.** जानकी जीवनम्, वामनावतरणम्, धर्मानन्दचरितम् एतानि काव्यानि केन रचितानि सन्ति ?
(A) आचार्य राजेन्द्र-मिश्राभिराजेन
(B) आचार्य राधाबल्लभ-त्रिपाठिना
(C) आचार्य रेवाप्रसाद-द्विवेदिना
(D) आचार्य विन्ध्येश्वरी-प्रसादमिश्रेण

**27.** चित्रकूटस्य तुलसीपीठस्य अधीश्वराः के महात्मनः सन्ति
(A) स्वामी राजेन्द्रदासाः
(B) स्वामी रामभद्राचार्याः
(C) स्वामी बल्लभाचार्याः
(D) स्वामी नृत्यगोपालदासाः

**28.** गीतकाव्येषु भक्तिगीतसुधा, राघवगीतगुञ्जन, राघवप्रेमकता, माधवप्रेमलता इति रचनाः कस्य महाकवेः सन्ति ?
(A) स्वामि श्री रामभद्राचार्यस्य
(B) स्वामि श्री कमलदासस्य
(C) स्वामि श्री रामनरेशाचार्यस्य
(D) स्वामि श्री वासुदेवाचार्यस्य

**29.** स्वामि रामभद्राचार्यस्य जन्म कस्मिन् जनपदे सञ्जातम् आसीत्
(A) सुल्तानपुरजनपदे
(B) वाराणसीजनपदे
(C) चित्रकूटजनपदे
(D) जौनपुरजनपदे

**30.** प्रतानिनी, इति काव्यसंकलन ग्रन्थः कस्य कवेरस्ति ?
(A) आचार्य भास्कराचार्य त्रिपाठिनः
(B) आचार्य बच्चूलाला वस्थिनः
(C) आचार्य रहसविहारि द्विवेदिनः
(D) आचार्य विन्ध्येश्वरी प्रसाद मिश्रस्य

31. रत्यादेः स्थायिनः कारणानि काव्ये किं कथ्यन्ते ?
(A) विभावाः
(B) अनुभावाः
(C) व्यभिचारिणः
(D) सात्विकभावाः

32. अधोलिखितेषु रसशास्त्रेण असम्बद्धो ग्रन्थो नास्ति
(A) अथर्ववेदः
(B) कामसूत्रम्
(C) नाट्यशास्त्रम्
(D) शिल्पशास्त्रम्

33. अधोलिखितेषु केन स्वग्रन्थे रसस्वरूपं वर्णितम् ?
(A) भामहेन
(B) दण्डिना
(C) रुद्रटेन
(D) वामनेन

34. अधोलिखितेषु रसस्वरूपविषयकमसङ्गतं वाक्यं चिनुत
(A) स्वप्रकाशानन्दमयः
(B) वेद्यान्तरस्पर्शशून्यः
(C) लौकिकचमत्कारप्राणः
(D) ब्रह्मास्वादसहोदः

35. अधोलिखितेषु को व्यभिचारिभावमध्ये न परिगणितः ?
(A) ग्लानिः
(B) प्रबोधः
(C) मरणम्
(D) हास्यम्

36. औचित्यविचारचर्चाग्रन्थे औचित्यस्य कति प्रकाराः वर्णिताः ?
(A) पञ्चविंशतिः
(B) षड्विंशतिः
(C) सप्तविंशतिः
(D) त्रिंशत्

37. औचित्यप्रस्थानदिशा काव्यस्य जीवितं किम् ?
(A) ध्वनिः
(B) औचित्येम्
(C) रसः
(D) अलङ्कारः

38. औचित्यविचारचर्चाग्रन्थ माधृत्य – ''जातं वंशे भुवनविदिते पुष्करावर्तकाना''मित्यत्र किंविधम् औचित्यं वर्तते ?
(A) गुणगतौचित्यम्
(B) वाक्यगतौचित्यम्
(C) विशेषणगतौचित्यम्
(D) प्रबन्धार्थगतौचित्यम्

39. औचित्यविचारचर्चाग्रन्थदृशा –
''विश्रान्तविग्रहकथो रतिमाञ्जनस्य चित्ते वसन
प्रियवसन्तक एव साक्षात् । पर्युत्सुको
निजमहोत्सवदर्शनाय, वत्सेश्वरः कुसुमचाप-
इवाभ्युपैति ।।'' इत्यत्र किंविधमौचित्यं विद्यते ?
(A) अलङ्कारगतौचित्यम्
(B) गुणगतौचित्यम्
(C) रसगतौचित्यम्
(D) वाक्यगतौचित्यम्

40. बालेन्दुवक्राण्यविकासभावाब्द्भुः
पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव
वनस्थलीनाम् ।।'' इत्यस्मिन् –पद्ये
किंविधमौचित्यं प्रदर्शितम् ?
(A) अलङ्कारगतौचित्यम्
(B) पदगतौचित्यम्
(C) रसगतौचित्यम्
(D) विशेषणगतौचित्यम्

41. मम्मटमते शान्तरसस्य स्थायिभावोऽस्ति

(A) शम:

(B) निर्वेद:

(C) विषाद:

(D) जडता

42. त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-मात्मानं ते चरणपतितं यावदिच्छामिकर्तुम् ।

अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे

क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।।

इदमुदाहरणमस्ति

(A) अभिलाषहेतुकविप्रलम्भशृङ्गारस्य

(B) विरहहेतुकविप्रलम्भशृङ्गारस्य

(C) प्रवासहेतुकविप्रलम्भशृङ्गारस्य

(D) शापहेतुकविप्रलम्भशृङ्गारस्य

43. देवमुनिगुरुनृपपुत्रादिविषया रति: किमुच्यते ?

(A) भाव:

(B) रसाभास:

(C) भावाभास:

(D) भावसन्धि:

44. कस्योदाहरणमिदम्

क्वाकार्यं शशलक्ष्मण: क्व च कुलं भूयोऽपि दृश्यते सा

दोषाणां प्रशमाय न श्रुतमहो कोपेऽपिकान्तं मुखम् ।

किं वक्ष्यन्त्यपकल्मषा: कृतधिय: स्वप्नेऽपिसा दुर्लभा

चेत: स्वास्थ्यमुपैहि क: खलु युवा धन्योऽधरं धास्यति ।

(A) शृङ्गाररसस्य

(B) भावस्य

(C) रसाभासस्य

(D) भावशवलताया:

45. अनौचित्यप्रवर्तिता चिन्ता किमुच्यते ?

(A) भाव:

(B) रसाभास:

(C) भावाभास:

(D) भावोदय:

46. आचार्य-विश्वनाथेन कतिविधं काव्यं स्वीकृतमस्ति ?

(A) त्रिविधम्

(B) द्विविधम्

(C) एकविधम्

(D) चतुर्विधम्

47. 'शून्यं वासगृहं विलोक्य' इति कस्य उदाहरणम्

(A) रसस्य

(B) भावस्य

(C) रसाभासस्य

(D) भावाभासस्य

48. रमणीयार्थप्रतिपादक: शब्द: काव्यम् ।
अनेन काव्यलक्षणेन सम्बद्ध: आचार्य: क: ?

(A) भामह:

(B) विश्वनाथ:

(C) पण्डितराज जगन्नाथ:

(D) मम्मट:

49. "तस्य च कारणं कविगता केवला प्रतिभा ।
साच काव्यघटनानुकूलशब्दार्थोपस्थिति: ।"
एतत् क: स्वीकरोति ?

(A) पण्डितराज जगन्नाथ:

(B) मम्मट:

(C) उद्भट:

(D) आनन्दवर्धन:

50. "शब्दार्थौ यत्र गुणीभावितात्मानौ
कमप्यर्थमभिव्यङ्क्तस्तदाद्यम् ।"
एतत् लक्षणमस्ति –

(A) उत्तमम् – काव्यस्य

(B) मध्यम – काव्यस्य

(C) उत्तमोत्तम – काव्यस्य

(D) अवरम् – काव्यस्य

51. माधुर्यसौकुमार्योपपन्ना रीतिः कास्ति ?
(A) वैदर्भी
(B) गौडीया
(C) पाञ्चाली
(D) अवन्तिका

52. प्रासिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा किमुच्यते ?
(A) रीतिः
(B) वक्रोक्तिः
(C) गुणः
(D) मार्गः

53. कुन्तकमते कविव्यापारवक्रत्वस्य कति प्रकाराः सन्ति ?
(A) त्रयः
(B) चत्वारः
(C) पञ्च
(D) षट्

54. अलङ्कारवर्गः कुत्र अन्तर्भवति ?
(A) वर्णवक्रतायाम्
(B) पदपूर्वार्द्धवक्रतायाम्
(C) वाक्यवक्रतायाम्
(D) प्रबन्धवक्रतायाम्

55. कुन्तकेनोक्ता वर्णविन्यासवक्रता पूर्वाचार्यैः केन रूपेण स्वीकृता ?
(A) प्रवृत्तिरूपेण
(B) रीतिरूपेण
(C) संघटनारूपेण
(D) वृत्तिरूपेण

56. काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ।
इतीयं पंक्तिः कस्य ग्रन्थस्य अस्ति ?
(A) काव्यप्रकाशस्य
(B) साहित्यदर्पणस्य
(C) रसगङ्गाधरस्य
(D) वक्रोक्तिजीवितस्य

57. निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।
इति कस्य उदाहरणमस्ति ?
(A) अर्थान्तरसंक्रमितवाच्यध्वनेः
(B) संलक्ष्यक्रमव्यङ्ग्यध्वनेः
(C) अत्यन्ततिरस्कृतवाच्यध्वनेः
(D) असंलक्ष्यक्रमव्यङ्ग्यध्वनेः

58. मम्मटमते व्यङ्ग्यस्य अपेक्षया वाच्यस्य चमत्कारित्वात् काव्यभेदः भवति
(A) ध्वनिकाव्यम्
(B) गुणीभूतव्यङ्ग्यकाव्यम्
(C) शब्दचित्रकाव्यम्
(D) वाच्यचित्रकाव्यम्

59. यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणम् तद्द्वितीयम् इति लक्षणं केन प्रदत्तम् ?
(A) विश्वनाथेन
(B) मम्मटेन
(C) आनन्दवर्धनेन
(D) पण्डितराजजगन्नाथेन

60. वामनमते ये काव्यशोभां कुर्वन्ति ते सन्ति
(A) अलङ्काराः
(B) रीतयः
(C) गुणाः
(D) प्रवृत्तयः

61. अलंकार प्रस्थानस्य आद्याचार्यः कः ?
(A) भामहः
(B) मम्मटः
(C) विश्वनाथः
(D) वामनः

62. एतेषु कः भामहानन्तरं प्रधानः अलंकार-शास्त्रस्याचार्यः अस्ति ?
(A) भरतः
(B) दण्डी
(C) क्षेमेन्द्रः
(D) कुन्तकः

63. 'काव्यादर्शग्रन्थः' केन विरचितः ?
(A) मम्मटेन
(B) वामनेन
(C) दण्डिना
(D) विश्वनाथेन

64. "हारादिवदलङ्कारः" इति केनोक्तम् ?
(A) कुन्तकेन
(B) विश्वनाथेन
(C) वामनेन
(D) मम्मटेन

65. "छेकवृत्तिगतोद्विधा" कस्य भेदः अयम् ?
(A) श्लेषस्य
(B) अनुप्रासस्य
(C) यमकस्य
(D) रूपकस्य

66. रामायणोपजीव्ये उत्तररामचरिते नाटके अङ्गीरसः कः ?
(A) शान्तरसः
(B) वीररसः
(C) रौद्ररसः
(D) करुणरसः

67. शिशुपालवध काव्यस्य उपजीव्य ग्रन्थः कः ?
(A) रामायणम्
(B) श्रीमद्भागवतम्
(C) महाभारतम्
(D) दशकुमारचरितम्

68. वाल्मीकिमुनिः कस्मात् श्रीरामचरितं ज्ञातवान् ?
(A) वशिष्ठात्
(B) नारदात्
(C) विश्वामित्रात्
(D) पराशरात्

69. बुद्धचरिते कस्मिन् सर्गे बुद्धत्वप्राप्तिविषये वर्णनमस्ति ?
(A) द्वादशे सर्गे
(B) सप्तदशे सर्गे
(C) प्रथमे सर्गे
(D) चतुर्दशे सर्गे

70. भासप्रणीते अविमारके अविमारकस्य पिता कः ?
(A) धर्मराजः
(B) सौवीरराजः
(C) अशोकः
(D) घटकर्परः

71. नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ।।
एतत् काव्यकारणं कः स्वीकरोति ?
(A) पण्डितराज जगन्नाथः
(B) भामहः
(C) आनन्दवर्धनः
(D) दण्डी

72. मम्मटस्य काव्यलक्षणमस्ति
(A) वाक्यं रसात्मकं काव्यम्
(B) रमणीयार्थप्रतिपादकः शब्दः काव्यम्
(C) लोकानुकीर्तनं काव्यम्
(D) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि

73. काव्यकारणे "त्रयः समुदिताः, न तु व्यस्ताः, हेतुर्न्न तु हेतवः" इति कः स्वीकरोति ?
(A) मम्मटः
(B) वामनः
(C) भामहः
(D) पण्डितराजः

74. वैभाकरणमतेन ध्वनिः कथ्यते
(A) स्फोटः
(B) स्फोटस्य व्यञ्जकः शब्दः
(C) व्यङ्ग्यार्थः
(D) शब्दार्थयुगानम्

75. "वाक्यं रसात्मकं काव्यम्"
एतत् काव्यलक्षणमस्ति
(A) मम्मटस्य
(B) वामनस्य
(C) विश्वनाथस्य
(D) दण्डिनः

76. कादम्बर्याः एषः प्रणेता
(A) मम्मटभट्टः
(B) बाणभट्टः
(C) नागेशभट्टः
(D) मयूरभट्टः

77. मुद्राराक्षसनाटके पर्वतकस्य पुत्रः कः ?
(A) चन्द्रगुप्तः
(B) मलयकेतुः
(C) राक्षसः
(D) चन्दनदासः

78. "धृष्टद्युम्नः" कस्य पुत्रः ?
(A) युधिष्ठिरस्य
(B) द्रोणाचार्यस्य
(C) जयद्रथस्य
(D) द्रुपदस्य

79. "व्रजाङ्गनानामपि गानशालिनां " इत्यत्र किं छन्दः ?
(A) आर्या
(B) इन्द्रवज्रा
(C) वंशस्थविलम्
(D) हरिणी

80. हरिणीछन्दसः गणक्रमः कः ?
(A) न स म र स लघु गुरु
(B) स न म र स लघु गुरु
(C) म भ न त म गुरु गुरु
(D) भ र न भ न लघु गुरु

81. अभिहितान्वयवादिनो भवन्ति
(A) मुरारिमिश्रावलम्बिनः
(B) भाट्टाः
(C) सौगताः
(D) वेदान्तिनः

82. "कुन्ताः प्रविशन्ति" इत्यत्र भवति
(A) लक्षण-लक्षणा
(B) सारोपा-लक्षणा
(C) उपादान-लक्षणा
(D) साध्यवसाना-लक्षणा

83. सादृश्यादन्यत्कार्यकारणभावादि संबन्धान्तरं भवति
(A) "कुन्ताः प्रविशन्ति" इत्यादौ
(B) "गङ्गायां घोष" इत्यादौ
(C) "गौर्वाहीक" इत्यादौ
(D) "आयुर्घृतम्" इत्यादौ

84. विषयिणाऽऽरोप्यमाणेनान्तः कृते
निगीर्णेऽन्यस्मिन्नारोपविषये सति सा स्यात्
(A) साध्यवसाना-लक्षणा
(B) उपादान-लक्षणा
(C) सारोपा-लक्षणा
(D) लक्षण-लक्षणा

85. मम्मटानुसारं "सशङ्खचक्रो हरिः" इत्यत्र हरिशब्देन विष्णोः बोधो भवति
(A) संयोगेन
(B) विप्रयोगेन
(C) साहचर्येण
(D) अर्थेन

86. पर्यायवक्रता कस्याः भेदः ?
(A) वर्णविन्यासवक्रतायाः
(B) पदपूर्वार्द्धवक्रतायाः
(C) पदपदार्थवक्रतायाः
(D) वाक्यवक्रतायाः

**87.** सुकुमारमार्गस्य प्रथमो गुणोऽस्ति

(A) माधुर्यम्

(B) प्रसाद:

(C) ओज:

(D) कान्ति:

**88.** अतिदु:सञ्चरो मार्गोऽस्ति

(A) विचित्र:

(B) मध्यम:

(C) आभिजात्य:

(D) असुकुमार:

**89.** माधुर्यादि गुणग्रामो नानारुचिमनोहरो मार्गो वर्तते

(A) सुकुमार:

(B) विचित्र:

(C) मध्यम:

(D) लावण्य:

**90.** सादृश्याल्लक्षणा वक्रोक्ति: इत्यस्य केन ग्रन्थेन सम्बन्ध: ?

(A) काव्यप्रकाशेन

(B) काव्यादर्शेन

(C) काव्यालङ्कारसूत्रेण

(D) ध्वन्यालोकेन

**91.** अधोलिखितेषु किं भामहाभिमतं काव्यप्रयोजनं नास्ति ?

(A) वाग्विदग्धता

(B) प्रीति:

(C) कलासु वैचक्षण्यम्

(D) धर्मार्थकाममोक्षेषु वैचक्षण्यम्

**92.** 'वामनमते' काव्यस्य अदृष्टप्रयोजनं किमस्ति ?

(A) कीर्ति:

(B) प्रीति:

(C) चतुर्वर्गफलप्राप्ति:

(D) व्यवहारज्ञानम्

**93.** भरतमते हितोपदेशजननं किम् ?

(A) नृत्यम्

(B) नृत्तम्

(C) लास्यम्

(D) नाट्यम्

**94.** रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं काव्यं कथं करोति ?

(A) मित्रमिव

(B) प्रभुरिव

(C) कान्तेव

(D) गुरुरिव

**95.** अल्पधियाम् इत्यस्य कोऽर्थ: ?

(A) परिणतबुद्धीनाम्

(B) अल्पज्ञानाम्

(C) सुकुमारबुद्धीनाम्

(D) मन्दबुद्धीनाम्

**96.** ध्वनिप्रस्थानप्रवर्तक: आचार्य: क: ?

(A) आनन्दवर्धन:

(B) विश्वनाथ:

(C) मम्मट:

(D) जगन्नाथ:

**97.** ध्वनिप्रस्थानदिशा महाकवीनां वाणीषु लावण्यमिव को विभाति ?

(A) वाच्यार्थ:

(B) लक्ष्यार्थ:

(C) तात्पर्यार्थ:

(D) प्रतीयमानार्थ:

98. निम्नलिखितेषु ध्वनिप्रस्थानसमर्थकः आचार्योऽस्ति

(A) भामहः

(B) वामनः

(C) मम्मटः

(D) कुन्तकः

99. ध्वनिलक्षणमाधृत्य ध्वनिर्भवति

(A) वाच्यप्राधान्ये

(B) व्यङ्ग्यप्राधान्ये

(C) लक्ष्यप्राधान्ये

(D) तात्पर्यप्राधान्ये

100. "सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।"
इत्यत्र कः ध्वनिर्विद्यते ?

(A) स्वतः सम्भवीध्वनिः

(B) अलक्ष्यक्रमव्यङ्ग्यध्वनिः

(C) कविप्रौढोक्तिसिद्धध्वनिः

(D) अविवक्षितवाच्यध्वनिः

101. "शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः" इति सुप्रसिद्धवर्णनं कस्य कवेः ?

(A) कालिदासस्य

(B) शूद्रकस्य

(C) बाणभट्टस्य

(D) भट्टनारायणस्य

102. मुद्राराक्षसनाटकस्य कर्ता कः ?

(A) भारविः

(B) माघः

(C) भवभूतिः

(D) विशाखदत्तः

103. शिवराज-विजयस्य प्रणेता कः ?

(A) त्रिविक्रमभट्टः

(B) कल्हणः

(C) सुबन्धुः

(D) अम्बिकादत्तव्यासः

104. एतेषु श्रीहर्षविरचितं महाकाव्यं किम् ?

(A) नैषधीयचरितम्

(B) शिशुपालवधम्

(C) रघुवंशम्

(D) बुद्धचरितम्

105. दशकुमारचरितं कीदृशं काव्यम् ?

(A) पद्यकाव्यम्

(B) चम्पूकाव्यम्

(C) गद्यकाव्यम्

(D) स्त्रोत्रकाव्यम्

106. श्लेषः कति विधः ?

(A) एकधा

(B) द्विधा

(C) पञ्चधा

(D) अष्टधा

107. मम्मटेन कति अर्थालंकाराः स्वीकृताः ?

(A) एकषष्टिः

(B) पञ्चषष्टिः

(C) सप्तषष्टिः

(D) एकोनसप्ततिः

108. सादृश्यमूलकोऽलंकारः कति विधः ?

(A) एकधः

(B) द्विधः

(C) चतुर्विधः

(D) पञ्चधः

109. पूर्णोपमायाः कति भेदाः सन्ति ?

(A) पञ्च

(B) षट

(C) सप्त

(D) अष्टौ

110. "वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्" कस्य परिभाषा इयम् ?

(A) श्लेषस्य

(B) उपमायाः

(C) यमकस्य

(D) रूपकस्य

**111.** वामनमते पदरचनायाः गाढत्वं किमुच्यते ?

(A) प्रसादगुणः

(B) ओजगुणः

(C) माधुर्यगुणः

(D) श्लेषगुणः

**112.** वामनाभिमतः समताख्यः गुणः मम्मटेन केन रूपेण स्वीकृतः ?

(A) गुणरूपेण

(B) अलङ्काररूपेण

(C) दोषत्यागरूपेण

(D) दोषरूपेण

**113.** मुख्यार्थहतिर्दोषः इत्यस्मिन् हतिः इत्यस्य पदस्य कोऽर्थः ?

(A) विनाशः

(B) न्यूनत्वम्

(C) अपकर्षः

(D) उत्कर्षः

**114.** मम्मटमते आम्नातमपि कविभिर्नादृतं दोषोऽस्ति

(A) असमर्थम्

(B) अप्रयुक्तम्

(C) निहितार्थम्

(D) अनुचितार्थम्

**115.** शान्तशृङ्गारयोर्नैरन्तर्येण विरोधस्य परिहारः कथं भवति ?

(A) मध्ये रसान्तरस्य प्रयोगे

(B) भिन्नाश्रये प्रयोगे

(C) अङ्गाङ्गीभावरूपेण प्रयोगे

(D) साम्यरूपेण प्रयोगे

**116.** अधोलिखितेषु सुमेलितं युग्मं चिनुत ।

| | | |
|---|---|---|
| i. | अभिलाषः | – विप्रलम्भशृङ्गारस्य भेदः |
| ii. | रोमाञ्चः | – व्यभिचारिभावः |
| iii. | विरहः | – विप्रलम्भशृङ्गारस्य भेदः |
| iv. | शापः | – व्यभिचारिभावः |

(A) i एवम् iii

(B) केवलम् i

(C) केवलम् iii

(D) iii एवम् iv

**117.** भट्टलोल्लटमते रसस्य प्रतीयमानता मुख्यरूपेण कुत्र भवति ?

(A) तटस्थे

(B) अनुकार्ये

(C) सामाजिके

(D) नटे

**118.** भावकत्व-व्यापारस्य कल्पना केन कृता ?

(A) भट्टलोल्लटेन

(B) श्रीशङ्कुकेन

(C) भट्टनायकेन

(D) अभिनवगुप्तेन

**119.** शृङ्गारादि रसो विभावादिजीवितावधिः, इति कस्य मतम् ?

(A) भट्टलोल्लटस्य

(B) मम्मटस्य

(C) भट्टनायकस्य

(D) अभिनवगुप्तस्य

**120.** चित्रं महानेष बतावतारः क्व
कान्तिरेषा भिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः
काप्याकृतिर्नूतन एष सर्गः ।।

उदाहरणमिदं कस्य रसस्य ?

(A) वीररसस्य

(B) अद्भुतरसस्य

(C) शान्तरसस्य

(D) भयानकरसस्य

121. शब्दब्रह्मविभाविता सर्वमङ्गला अलंकृतार्थ संवित्तिः कविता इति काव्यलक्षणं कस्य आचार्यस्य विद्यते ?
(A) आचार्य रहसविहारि द्विवेदिनः
(B) आचार्य रेवाप्रसाद द्विवेदिनः
(C) आचार्य अभिराज राजेन्द्र मिश्रस्य
(D) आचार्य राधाबल्लभ त्रिपाठिनः

122. पश्यन्त्येव यदि प्राज्ञाः काव्य सृष्टौप्रयोजनम् । परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते ।। इति काव्य प्रयोजन कस्य ?
(A) श्री अभिराज राजेन्द्र मिश्रस्य
(B) श्री राधाबल्लभ त्रिपाठिनः
(C) आचार्य रेवाप्रसाद द्विवेदिनस्य
(D) कस्यचिदन्यस्य आचार्यस्य

123. काव्यं लोकोत्तराख्या नं रसगर्भं स्वभावजम् । परत्रेह च निर्व्याजं यशोऽवाप्ति प्रयोजनम् ।। इति काव्यं लक्षणं कस्य ?
(A) आचार्य रेवाप्रसाद-द्विवेदिनः
(B) आचार्य राजेन्द्र-मिश्राभिराजस्य
(C) आचार्य राधाबल्लभ-त्रिपाठिनः
(D) आचार्य रहसविहारि-द्विवेदिनः

124. अभिनवकाव्यालङ्कारसूजमिति रचना कस्य आचार्यस्य विद्यते ?
(A) आचार्य राधाबल्लभ-त्रिपाठिनः
(B) आचार्य रेवाप्रसाद-द्विवेदिनः
(C) आचार्य राजेन्द्र-मिश्राभिराजस्य
(D) कस्यचिदन्यस्य आचार्यस्य

125. उत्तररामचरितम्, स्वातन्त्र्यसम्भवम्, कुमारविजयम् इति कृतयः कस्य महाकवेः सन्ति ?
(A) आचार्य राजेन्द्र-मिश्राभिराजस्य
(B) आचार्य रेवाप्रसाद-द्विवेदिनः
(C) आचार्य रहसविहारि-द्विवेदिनः
(D) आचार्य राधाबल्लभ-त्रिपाठिनः

126. आचार्यभामहमते स्वरूपविधानमाधृत्य काव्यस्य कति भेदाः ?
(A) द्वौ
(B) त्रयः
(C) चत्वारः
(D) पञ्च

127. दण्डीमते पद्यकाव्यस्य कति भेदाः ?
(A) द्वौ
(B) त्रयः
(C) चत्वारः
(D) पञ्च

128. मम्मटस्य काव्यलक्षणे इदं नास्ति
(A) अदोषौ
(B) शब्दौ
(C) सगुणौ
(D) अनलङ्कृती पुनः क्वापि

129. आचार्यदण्डी गद्यकाव्यस्य कियान् भेदान् मनुते ?
(A) पञ्च
(B) चतुरः
(C) त्रीणि
(D) द्वौ

130. सुबन्धुरचितावासवदत्ता-अस्ति
(A) नाटकम्
(B) काव्यम्
(C) कथा
(D) चम्पूकाव्यम्

131. "तदेव गगनं सैव धरा" इति काव्यसंकलनग्रन्थः कस्य महाकवेर्विद्यते ?

(A) आचार्य बच्चूलाला-वस्थिनः

(B) आचार्य भास्कराचार्य-त्रिपाठिनः

(C) आचार्य राजेन्द्रमिश्राभिराजस्य

(D) आचार्य श्रीनिवासरथस्य

132. निर्झरिणी, एवं सुतनुकालास्यम्, इति कृतिद्वयं कस्य महाकवेः विद्यते ?

(A) आचार्य बच्चूलाला वस्थिनः

(B) आचार्य भास्कराचार्य त्रिपाठिनः

(C) आचार्य श्रीनिवासरथस्य

(D) आचार्य मिथिलाप्रसाद त्रिपाठिनः

133. शृङ्गारसप्तशतिका, काव्याधिकरकन्दभूतिविमर्शः इति कृतिद्वयं कस्य रचनाकारस्य विद्यते ?

(A) आचार्य रहसविहारि द्विवेदिनः

(B) आचार्य रेवाप्रसाद द्विवेदिनः

(C) आचार्य भास्कराचार्य त्रिपाठिनः

(D) आचार्य बच्चूलाला वस्थिनः

134. सृजतिकिल शङ्खनादं कविता इति काव्यरचना कस्य कवेर्विद्यते ?

(A) आचार्य विन्ध्येश्वरी प्रसाद मिश्रस्य

(B) आचार्य रहसविहारि द्विवेदिनः

(C) आचार्य भास्कराचार्य त्रिपाठिनः

(D) आचार्य मिथिलाप्रसाद त्रिपाठिनः

135. सतनाभिगौरवम्, भार्गवीयम्, श्रीहर्षण सौरभम् एतानि महाकाव्यानि केन महाकविना रचितानि सन्ति ?

(A) आचार्य रेवाप्रसाद द्विवेदिना

(B) आचार्य राजेन्द्र मिश्राभिराजेन

(C) आचार्य रामभद्राचार्येण

(D) आचार्य मिथिलाप्रसाद त्रिपाठिना

136. संकेतितस्यार्थस्य मम्मटानुसारं भेदा भवन्ति

(A) चत्वारः

(B) पञ्च

(C) षट्

(D) सप्त

137. "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते" -इति श्लोकार्धः अस्ति काव्य प्रकाशस्य

(A) प्रथमे उल्लासे

(B) द्वितीये उल्लासे

(C) तृतीये उल्लासे

(D) चतुर्थे उल्लासे

138. मम्मटानुसारं साक्षात्संकेतितः अर्थो भवति

(A) व्यङ्ग्यार्थः

(B) गुणीभूतव्यङ्ग्यः

(C) मुख्यार्थः

(D) लक्षणावृत्त्या प्राप्तः अर्थः

139. मम्मटानुसारं काव्ये शब्दो न भवति

(A) वाचकः

(B) लाक्षणिकः

(C) व्यञ्जकः

(D) निरर्थकः

140. अन्विताभिधानवादिनः सन्ति

(A) प्रभाकरानुयायिनः मीमांसका:

(B) नैयायिकाः

(C) बौद्धाः

(D) सांख्याः

141. "अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः" कस्य अलंकारस्य परिभाषा इयम् ?

(A) उपमा

(B) रूपकस्य

(C) निदर्शना

(D) श्लेषस्य

142. "पुनरेतेषां सर्वेषां प्रतिबिम्बनम्" कस्य लक्षणम् अयम् ?

(A) श्लेषस्य

(B) रूपकस्य

(C) यमकस्य

(D) दृष्टान्तस्य

**143.** "उपमानोपमेययोः यदि अभेदः स्यात्" तदा कः अलंकारः ?

(A) रूपकः

(B) उत्प्रेक्षा

(C) दीपकः

(D) निदर्शना

**144.** मम्मटमते कति अलंकाराः भवन्ति ?

(A) सप्तषष्टिः

(B) एकोनसप्ततिः

(C) एकोनाशीतिः

(D) सप्तसप्ततिः

**145.** "काव्यशोभायाः कर्तारो धर्माः गुणाः" केनोक्तम् ?

(A) कुन्तकेन

(B) मम्मटेन

(C) वामनेन

(D) भरतेन

**146.** रिक्तस्थानं पूरयतु

________ चम्पूरित्यभिधीयते ।

(A) विविधाख्यान संयुक्ता

(B) गद्यपद्यमयी काचित्

(C) कथाख्यानवल्लरी

(D) सर्वाः कथाः समायुक्ताः

**147.** दशरूपकेषु अस्य गणना नास्ति

(A) वीथी

(B) सट्टक

(C) व्यायोग

(D) डिम

**148.** उचितं मेलनं करोतु ।

| सूची – क | सूची– ख |
|---|---|
| 1. 5 अंकात् 10 अंकात्मकं | i. भाणः |
| 2. धूर्तचरितोपाख्यानम् | ii. नाटकम् |
| 3. धीरललित नायकः | iii. प्रकरणम् |
| 4. मृच्छकटिकम् | iv. नाटिका |

| | | | | |
|---|---|---|---|---|
| (A) | 1 – i | 2 – ii | 3 – iii | 4 – iv |
| (B) | 1 – ii | 2 – i | 3 – iv | 4 – iii |
| (C) | 1 – iv | 2 – iii | 3 – ii | 4 – i |
| (D) | 1 – iii | 2 – iv | 3 – i | 4 – ii |

**149.** धनञ्जयमते प्रहसनस्य कति भेदः ?

(A) 1

(B) 2

(C) 3

(D) 4

**150.** समुचितं उत्तरं चिनुत

1. बिन्दुः अर्थप्रकृतेः एकः भेदः ।
2. प्रयोजनसिद्धिहेतुः अर्थप्रकृतिः ।
3. आरम्भः नाट्यावस्थायाः भेदो नास्ति ।
4. पताका नाट्यसन्धिषु अन्यतमा ।

(A) सर्वेऽपि सत्याः

(B) 3, 4 सत्यौ

(C) सर्वेऽपि असत्याः

(D) 1, 2 सत्यौ

## रफ़ कार्य / ROUGH WORK